abhinavakaustubhamAlA by Shrikrishnalilashukamuni

# श्रीकृष्णलीलाशुकमुनिप्रणीता अभिनवकौस्तुभमाला

## Document Information

Text title : Abhinavakaustubhamala

File name : abhinavakaustubhamAlA.itx

Category : vishhnu, shrIkRiShNalIlAshukamuni

Location : doc_vishhnu

Author : Shrikrishnalilashukamuni

Proofread by : Preeti N. Bhandare

Latest update : November 27, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# श्रीकृष्णलीलाशुकमुनिप्रणीता अभिनवकौस्तुभमाला

(कौस्तुभमालास्तोत्रम्)
लक्ष्मीश्च कौस्तुभश्चेति यद्रत्नद्वयमुद्धृतम् ।
तन्नः कामदुघं भूयात् तेजस्त्रैलोक्यमङ्गलम् ॥ १॥

यत्र साम्राज्यचिह्नानि यामिनां हृदयैः सह ।
श्रीश्च जाग्रति तज्जीयाच्छ्रीश! त्वच्चरणाम्बुजम् ॥ २॥

यच्चादिकवयो व्यासप्रमुखाः सपितामहाः ।
भागीरथीसरस्वत्योः प्रवाहप्रभवं विदुः ॥ ३॥

(युग्मकम्)
किं ब्रूमः प्रपदं देव! यस्य प्रतिनिधावपि(१) ।
पृष्ठे जरढकूर्मस्य जगती प्रतितिष्ठति ॥ ४॥

तेऽमी नखेन्दवो देव! यान् हि नाभिसरोजभूः ।
पुरा सिसृक्षितस्येन्दोः प्रतिमामन्वमन्यत ॥ ५॥

जयतां जगतां नाथ! गुल्फावुत्फुल्लविभ्रमौ ।
यावनुस्मरतां गाढमुन्नतिर्न(२) तथानयोः ॥ ६॥

तव देव! पदं धन्या मणिभूषणमण्डली ।
वेषान्तरेण वेदान्तवाणीव विनिषेवते ॥ ७॥

निर्वाणसंज्ञकं देव! तव तत् परमं पदम् ।
चिरात् प्रविशतां शङ्के जङ्घे मङ्गल्यतोरणे ॥ ८॥

एते ते जानुनी नाथ! यशोदाङ्गणरिङ्गिणी ।
लक्ष्मीः करीषगन्धान्ध्यच्छलाज्जिघ्रति(३) ये (स्मिता?)(४) ॥ ९॥

तावूरू जयतां यौ किं द्वौ करौ स्मरहस्तिनः ।
हस्तिपृष्ठाप्रतिष्ठश्चेन्नैव(५) देवः श्रियं जयेत् ॥ १०॥

त्वत्कटीतटसौभाग्ये स्वामिन्नास्मद्गिरां गतिः ।
लक्ष्मीवसुन्धराधन्यमनीषास्तत्र जाग्रतु ॥ ११॥

कामरूपैव देव! श्रीर्येयं वक्षस्तटे स्थिता ।
कटीतटेऽपि कामान्धा भाति पीताम्बरात्मना ॥ १२॥

काञ्चीयं काञ्चनी नाथ! भाति रत्नप्रभोद्भटा ।
मुग्धयेव कृता लक्ष्म्या मदान्धस्मरशृङ्खला ॥ १३॥

सेयं नाभी यया देव! शङ्खः सङ्घृष्य गर्जति ।
लक्ष्मीविरिञ्चयोः स्पर्धा वस्तुं यत्सरसीरुहे ॥ १४॥

वलित्रयमिदं देव! जगत्त्रयमनोहरम् ।
माधुर्यवारिधेर्धत्ते वीचीनां विभ्रमश्रियम् ॥ १५॥

श्रीमानुदरबन्धोऽयं श्रियं देवस्य पुष्यति ।
कान्तिसिन्धौ दृशोः क्रीडाप्लवः क्लृप्त इव श्रियः ॥ १६॥

लोकैकनाथ! रम्येयं रोमराजी विराजते ।
क्लृप्तेव प्रथमं लक्ष्म्या वक्षोहर्म्याधिरोहणी ॥ १७॥

श्रीवत्सः श्रीनिधे! सोऽयं श्रियं कामपि पुष्यति ।
यः पद्मजापदाम्भोजक्रीडाचिह्नानि निह्नुते ॥ १८॥

चकास्ति कौस्तुभः सोऽयं तव देव! भुजान्तरे ।
पयोधिराजकन्याया हर्म्यदीप इवार्पितः ॥ १९॥

नानारत्नसहस्राणि नाथ! वक्षसि जाग्रति ।
रत्नाकरसुतोद्वाहयौतकानीव कानिचित् ॥ २०॥

वैजयन्तीमिमां(६) देव! मन्ये साधारणीं(७) ध्रुवम् ।
ममत्वपात्रं भृङ्गाणां देवस्य(८) मदनस्य च ॥ २१॥

भान्ति ते जगतां नाथ! भुजा भूषणभूषणाः ।
जगद्भारोद्वहैश्चक्रे यैश्चक्रादिभरश्रमः ॥ २२॥

पाणयश्चक्रपाणे! ते भान्ति भक्ताभयप्रदाः ।
येषां दक्षिणतैवासील्लक्ष्मीपाणिग्रहोत्सवे ॥ २३॥

लोकपालललाटेषु लक्ष्म्याश्च स्तनमण्डले ।
लेखारसज्ञैर्यैः पञ्चशाखैः पञ्चशरः स्मरः ॥ २४॥

(युग्मकम्)
तेऽमी कररुहा देव! येषां विभ्रमविक्रमाः ।
कमलाविपुलोत्तुङ्गस्तनयोर्हृदि च द्विषः ॥ २५॥

कम्बु ग्रीवामिमां नाथ! कथं नु कथयामहे ।
लक्ष्मीकङ्कणमुद्राभिर्या त्रिरेखास्थितिं जहौ(९) ॥ २६॥

कर्णपाशाविमौ देव! स्फुरन्मकरकुण्डलौ ।
अवशाद्यत्प्रवेशान्धा मृगा मृगदृशां दृशः ॥ २७॥

तौ कपोलाविमौ देव! यावुद्वीक्ष्य रमाभुवौ ।
मन्ये नान्यावमन्येतां(१०) मङ्गल्यमणिदर्पणौ ॥ २८॥

अधरं देव! बिम्बोष्ठममृतं भुवनोत्तरम् ।
आहुर्विपर्ययेणात्र(११) प्रमाणं प्राणवल्लभे ॥ २९॥

तवाधरसुधा सेयं यां निपीय पयोधिजा ।
ततः प्रभृति वै देव! सुधान्तरमुपेक्षते ॥ ३०॥

दन्तपङ्क्तिरियं देव! दशनच्छदरञ्जिता ।
मुखेन्दुकान्तेराधत्ते मुक्तावलिपरिष्क्रियाम् ॥ ३१॥

देव! त्वन्नासिकावज्रकुसुमं प्राप्य मन्मथः ।
कुसुमान्तरसम्पत्तिं मन्यते पङ्क्तिपूरणम् ॥ ३२॥

अनयोः पुण्डरीकाक्ष ! नेत्रयोः पुण्डरीकयोः ।
मुखेन्दुः कान्तिसरसी मूलभूमिस्तु चिन्त्यताम्(१२) ॥ ३३॥

देव! क्रीडाकटाक्षाय भूयो बद्धोऽयमञ्जलिः ।
कामं न केवलं लक्ष्म्या यो दुग्धे जगतामपि ॥ ३४॥

तदेतद् वदनं देव! माधुर्यमिव मूर्त्तिमत् ।
वीक्ष्य सेवाच्छलारूढनासाग्राङ्गुलि(१३) यज्जगत् ॥ ३५॥

यत्र स्वयंवरे स्पर्धा लक्ष्मीकान्त्योः किलाभवत् ।
वेदाश्च केलिजल्पाश्च सौभ्रात्रं यत्र बिभ्रते ॥ ३६॥

(युग्मकम्)
पद्मचन्द्रमधुज्योत्स्नाविवादान्ध्येष्वनादिषु ।

देव! त्वद्वक्त्रबिम्बस्य स्मितस्य च किमुच्यताम्(१४) ॥ ३७॥

कस्तूरीतिलकामोदे ललाटे भ्रमरैर्वृते ।
देव! त्वद्भ्रूलताभृङ्गचमूः पाति मुखाम्बुजम् ॥ ३८॥

अष्टमीन्दुनिभस्यास्य ललाटाष्टापदस्य ते ।
यौवराज्यपदं देव! मुखेन्दुरनुमन्यताम् ॥ ३९॥

नाथ! धम्मिल्लभारेऽस्मिन् नानासौरभनिर्भरे ।
भृङ्गैर्लक्ष्मीकटाक्षाणां जृम्भतेऽतिमृधं मुधा ॥ ४०॥

नाथ! त्वामेव मन्येऽहमचलं भुवनोन्नतम् ।
अनुल्लङ्घ्येव यन्मौलिं छलादर्कोऽपि(१५) सेवते ॥ ४१॥

देव! त्वद्भक्तिरथवा त्वत्तोऽपि द्विगुणोन्नता ।
जितस्त्वमसि यद्भ्राजा प्रह्लादेन रणेऽपि हि ॥ ४२॥

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४३॥

तदिदं त्वद्वपुर्देव! नीलं निर्वृतिमन्मयम् ।
कान्तिभूषाशताभोगकर्बुरं भातु मे मुहुः ॥ ४४॥

तत्त्वं परं किमपि यत् स्वरसावभासि
सान्द्रप्रमोदलहरीभरिताखिलाशम् ।
कैवल्यविग्रहमिदं तदनुग्रहार्थ-
मस्मादृशां जयति तादृगुपात्तमूर्त्ति ॥ ४५॥

अनुभवतममुं भृशं दृशावभिनवकौस्तुभमालयानयां(१६) ।
भुवनविभुमभूतपूर्वया पुलकपरम्परया च भूषितम् ॥ ४६॥

श्रीकृष्णकेलिशुकवाङ्मयवीचिमाला-
लीलारसज्ञ(मकर) श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥ ४७॥

इति श्रीकृष्णलीलाशुकमुनिविरचिता
सप्तचत्वारिंशत्सङ्ख्या अभिनवकौस्तुभमाला समाप्ता ।

पादटिप्पणी

१. साक्षात् तस्मिन् जगती प्रतितिष्ठतीति किमु वक्तव्यमित्यापिशब्देन द्योत्यते ।
२. उन्नतिरुत्कर्ष उत्सेधश्च ।
३. करीषगन्धान्ध्यं शुष्कगोमयगन्धव्याप्तत्वं तस्यच्छलात्
तद्रूपाद्वा कल्पिता-लिङ्गादित्यर्थः । जिघ्रति स्पृशति इति मन्ये इति
शेषः । एवञ्च लक्ष्मीसंसर्गजमेवेदं जानुनोः करीषगन्धान्ध्यं,
न त्वङ्गणरिङ्गणवशजनितमिति तात्पर्यं फलितम् । लक्ष्मीश्च
करीषिणी श्रीसूक्ते श्रूयते – "गन्धद्वारान्दुराधर्षां नित्यपुष्टां
करीषिणीम् । ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम्" इति ।
४. "सदा" इति वा "मुदा" इति वा पाठो भवेत् ।
५. इदमर्धं "इतिप्रविष्टप्रतिश्नेनैव देवः श्रियं जयेत्?"
इत्येवादर्श - पुस्तके दृश्यते ।
६. "वैजयन्ती पताकायां जयन्त्यां केशवस्रजि" इति यादवः ।
७. साधारणीं सामान्यवनिताम् ।
८. देवस्य प्रकरणात् तवेत्यर्थः ।
९. कम्बुना त्रिरेखेण भाव्यं, न तु त्रिरेखाहीनेन । "त्रयी तु कम्बुः
शङ्खोऽस्त्री सुग्रीवो मधुरस्वनः । त्रिरेखः षोडशावर्तः" इति वैजयन्ती ।
१०. अन्यौ वास्तवौ ।
११. भुवनोत्तरत्वादुत्तर शति हि बिम्बोष्ठो वक्तव्यः, न त्वधर इति ।
१२. विरोधिन इन्दोरुत्पत्तिस्थानत्वमद्भुतमिति भावः ।
१३. सेवायाः सेवाकालिकाञ्जलेश्छलाव्द्याजाद् वस्तुतो विस्मयादित्यर्थः
आरूढनासाग्रा अङ्गुलयो यस्य तत् ।
१४. पद्मचन्द्रयोर्मधुज्योत्स्नयोश्चोत्कर्षाप्रतिष्ठानान्न किमपि
वक्तुमर्हमुपानतयेति भावः ।
१५. नेत्रस्थानावस्थानव्याजादित्यर्थः ।
सेवनं च मौल्यनुल्लङ्घनपूर्वमिहोत्प्रेक्ष्यम् ।
१६. अभिनवेति स्तुत्यर्थे नूतनार्थे च ।

Proofread by Preeti N. Bhandare

*abhinavakaustubhamAlA by Shrikrishnalilashukamuni*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*